**हस्तिकन्द** पु० हस्ती तत्पदमिव कन्दोऽस्य । स्वनामख्याते कन्दभेदे (हातिकाँदा) राजनि० ।

**हस्तिकरञ्ज** पु० हस्तीव महान् करञ्जः । महाकरञ्जे राजनि० ।

**हस्तिकर्ण** पु० हस्तिनः कर्ण इव पर्णमस्य अच् । १एरण्ड-वृक्षे २पलाशभेदे ३गणदेवताभेदे मेदि० । ४हस्तिकन्दे ५रक्तैरण्डे च राजनि० । स्वार्थे क तत्रार्थे । ६त० । ६गजस्य कर्णे । [अमरः ।

**हस्तिकर्णदल** पु० हस्तिनः कर्ण इव दलमस्य । पलाशभेदे

**हस्तिकोलि** पु० हस्तीव कोलिः । बदरीभेदे रत्नमा० ।

**हस्तिघोषा** स्त्री हस्तीव वृहती घोषा । वृहद्घोषायाम् मदनपालः । [घोषायाम् रत्नमा० ।

**हस्तिघोषातकी** स्त्री हस्तीव वृहती घोषातकी । हस्ति-

**हस्तिचारिणी** स्त्री हस्तीव चरति चर-णिनि ङीप् । महाकरञ्जे राजनि० ।

**हस्तिदन्त** पु० ६त० । १करिदन्ते । तदाकारोऽस्त्यस्य अच् । २मूलके न० राजनि० तत्रार्थे पु० शब्दर० । ३गृहभित्ति-निखातार्धे काष्ठनिर्मितकीलिकाकारे पदार्थे नागदन्ता-दयोऽप्यत्र । [कर्कटीभेदे राजनि० ।

**हस्तिदन्तफला** स्त्री हस्तिदन्त इव फलमस्याः । एर्वारौ

**हस्तिन्** पु० हस्तः शुण्डादण्डोऽस्त्यस्य । १गजे २चन्द्रवंश्ये नृपभेदे च ।

"सुहोत्रस्यापि दायादो हस्ती नाम बभूव ह । तेनेदं निर्मितं पूर्वं पुरैव हस्तिनापुरम् । हस्तिनश्चैव दायादा-स्त्रयः परमधार्मिकाः । अजमीढो द्विमीढश्च पुरुमीढ-स्तथैव च" हरिवं० २० अ० ।

**हस्तिनख** पु० हस्तिनो नख इव हस्तिना न खन्यते नञ्+ खन-ड वा । १पुरद्वारस्थे मृत्कूटे अमरः । २दुर्गद्वाराव-रोधनार्थं निम्नोन्नते खातोद्धृते मृद्राशौ च भरतः ।

**हस्तिनापुर** न० हस्तिना तदाख्यनृपेण चिह्नितं तत्कृतत्वात् पुरम् अलुक्स० । (दिल्ली) पुरभेदे ।

**हस्तिनी** स्त्री हस्तिनः योषा ङीप् । १करिण्याम् गजयो-षिति चतुर्विधस्त्रीमध्ये २स्त्रीविशेषे तल्लक्षणं यथा "स्थूलाधरा स्थूलनितम्बभागा स्थूलाङ्गुली स्थूलकुचा सुशीला । कामोत्सुका गाढरतिप्रिया च नितम्बखर्वा खलु हस्तिनी स्यात्" "हये तुष्टा च हस्तिनी" रति-मञ्जरी । ३हट्टविलासिन्यां शब्दच० । [स्वार्थे क तत्रैव ।

**हस्तिप** पु० हस्तिनं पाति पा-क । हस्त्यारोहे अमरः ।

**हस्तिपत्त** पु० हस्ती तत्कर्ण इव पत्त्रमस्य । हस्तिकन्दवृक्षे राजनि० । [दृश्यम् । राजकोषातक्यां स्त्री राजनि० ।

**हस्तिपर्णिका** स्त्री हस्ती तत्कर्ण इव पर्णमस्याः कप् अत

**हस्तिपर्णी** स्त्री हस्ती तत्कर्ण इव पर्णमस्याः ङीप् । १मोर-टाख्यलतायां रत्नमा० । २कर्कट्याञ्च राजनि० ।

**हस्तिमद** पु० ६त० । १करिकरनिःसृतमदजले । स इव । २गन्धद्रव्यभेदे च राजनि० ।

**हस्तिमल्ल** पु० हस्तिषु मल्लः । १ऐरावतगजे । २गणेशे ३शङ्खे ४नागे च मेदि० । [राजनि० ।

**हस्तिरोहणक** पु० हस्तीव रोहति ल्यु स्वार्थे क । महाकरञ्जे

**हस्तिलोध्रक** पु० हस्तीव लोध्रः स्वार्थे क । लोध्रभेदे राजनि०

**हस्तिविषाणी** स्त्री हस्तिविषाणं गजदन्तस्तदाकारः मध्य-भागः (थोड़) यस्याः गौरा० ङीष् । १कदल्याम् राजनि० ।

**हस्तिशुण्डा(ण्डी)** स्त्री हस्तिशुण्डस्तदाकारोऽस्त्यस्याः अच् वा गौरा० ङीष् । (हातिशुँड़ा) वृक्षे राजनि० ।

**हस्तिश्यामाक** पु० हस्तीव स्थूलः श्यामाकः । स्थूल-श्यामाके राजनि० । [कृत्य कृत्वा वा ।

**हस्ते** अव्य० हस्त+ए । १पाणौ इत्यर्थे २स्वीकारे च हस्ते-

**हस्त्य** त्रि० हस्तेन गृहीतः दत्तः कृतो वा यत् । १हस्तगृहीते २पाणिदत्ते ३पाणिकृते सि० कौ० ।

**हस्त्यध्यक्ष** पु० ७त० । गजाध्यक्षे गजरक्षणादौ नियुक्ते "हस्तिशिक्षाविधानज्ञो वन्यजातिविशारदः । क्लेशक्षम-स्तथा राज्ञो गजाध्यक्षः प्रशस्यते" मत्स्यपु० १८९ अ० ।

**हस्त्यारोह** पु० हस्तिनमारोहति आ+रुह अण् । हस्ति-पके अमरः ।

**हस्र** त्रि० हस-कर्मणि र । मूर्खे उणा० । [शब्दच० ।

**हहल** अव्य० हेति हलति । हालाहले स्थावरविषभेदे

**हहा** पु० हेति शब्दं जहाति हा-क्विप् । गन्धर्वभेदे शब्दमा०

**हा** त्यागे जु० प० स० अनिट् । जहाति जहति जहि अहासीत् हीयते ओदित् निष्ठातस्य नः हीनः हानिः ।

**हा** गतौ जु० आ० स० अनिट् ओदित् निष्ठातस्य नः । जि-हीते अहासिष्ट जहे हानम् ।

**हा** अव्य० हा-का । १विषादे २शोके ३पीडायाम् अमरः ४कुत्सायाञ्च मेदि० । हाशब्दस्य निन्दापरत्वे तद्योगे षष्ठ्यर्थे द्वितीया "हा लोकं कैशवद्विषम्" बोपदेवः । निन्दनीयपरत्वे न,"हा पितः ! क्वासि वैदेहि !" भट्टिः ।

**हाङ्गर** पुंस्त्री हा विषादाय पीडायै वा अङ्गं राति रा-क । स्वनामख्याते जलजन्तुभेदे शब्दच० स्त्रियां ङीष् ।

**हाटक** न० हट-ण्वुल् । १दैत्यभेदे २तत्रजे स्वर्णे तत्रास०